[६८१] ऋते च तृतीयासमासेऽवर्णाद् वृद्धिर्वक्तव्या । (म. भा. ३. ६९)

सुखेन ऋतः सुखार्तः । [1]दुःखेन ऋतः दुःखार्तः । ऋतः इति किम् ? सुखेन इतः सुखेतः । तृतीया इति किम् ? परमर्तः । समासे इति किम् ? सुखेनर्तः ।

[६८२] प्रवत्सतरकम्बलवसनानामृणे वृद्धिर्वक्तव्या । (म. भा. ३. ६९)

प्र – प्रार्णम् । वत्सतर – वत्सतरार्णम् । कम्बल – कम्बलार्णम् । वसन – वसनार्णम् ।

[६८३] ऋणदशाभ्यां वृद्धि[2]र्वक्तव्या । (म. भा. ३. ६९)

ऋणार्णम् । दशार्णम् ॥

## आटश्च । (९०/२६०)

एचि इति निवृत्तम् । अचि [3]इत्यनुवर्तते । आटः परो यो अच्, अचि च पूर्वो य आट्, तयोः पूर्वपरयोः आडचोः स्थाने वृद्धिरेकादेशो भवति । ऐक्षिष्ट । ऐक्षत । ऐक्षिष्यत । औभीत् । आर्ध्नोत् । औब्जीत् । [4]चकारोऽधिकविधानार्थः, उसि (६. १. ९६/२२१४) 'ओमाङोश्च' (६. १. ९५/८०) इति पररूपबाधनार्थः । औस्त्रीयत् । औङ्कारीयत् । आ ऊढा ओढा, तामैच्छत् औढीयत् ॥

## उपसर्गादृति धातौ । (९१/७४)

आत् इत्येव । अवर्णान्तादुपसर्गात् ऋकारादौ धातौ परतः पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति । आद्गुणापवादः । उपार्च्छति । प्रार्च्छति । उपार्ध्नोति । उपसर्गात् इति किम् ? खट्वर्च्छति । [5]मालर्च्छति । प्रगता ऋच्छका अस्माद् देशात् प्रर्च्छको देशः । '[6]यत्क्रियायुक्ताः प्रादयः तं प्रति गत्युपसर्गसञ्ज्ञकाः' (जै. प. ९९) इति । ऋति इति किम् ? उप इतः उपेतः । तपरकरणं किम् ? उप ॠकारीयति उपर्कारीयति । 'वा सुप्यापिशलेः' (६. १. ९२/७७) इति[7] विकल्पः स्यात् । उपसर्गग्रहणादेव धातुग्रहणे सिद्धे धातुग्रहणं [8]शाकलनिवृत्त्यर्थम् । 'ऋत्यकः' (६. १. १२८/९२) इति हि [9]शाकल्यस्य[10] प्रकृतिभावः प्राप्नोति ॥

## वा सुप्यापिशलेः । (९२/७७)

आत् इत्येव, उपसर्गात् [11]ऋति धातौ इति च । सुबन्तावयवे धातौ ऋकारादौ परतः [12]अवर्णान्तात् उपसर्गात् पूर्वपरयोः[13] आपिशलेराचार्यस्य मतेन वा वृद्धिरेकादेशो भवति । उपर्षभीयति, उपार्षभीयति । उपल्कारीयति, उपाल्कारीयति । [14]ऋकारऌकारयोः [15]सावर्ण्यविधिः इति ऋति इति ऌकारोऽपि गृह्यते । आपिशलिग्रहणं पूजार्थम्, वा इति ह्युच्यते एव ॥

---

1. उदाहरणमिदं नास्ति फ. 2. वक्तव्या नास्ति फ. 3. इति वर्तते क. 4. चशब्दः क. 5. उदाहरणमिदं नास्ति फ. 6. वाक्यमिदं नास्ति ब. फ. 7. हि इत्यधिकम् ब. 8. शाकल्यविकल्पनिवृत्त्यर्थम् फ. 9. शाकलस्य ङ. 10. मते इत्यधिकम् ब. 11. ऋति नास्ति फ. 12. अवर्णात् फ. 13. पश्चात् गृहीतः इत्यधिकम् क. 14. वाक्यमिदं नास्ति ग. 15. सवर्णसञ्ज्ञा क.